॥ श्रीश्रीगौरहरिर्जयति ॥

गौड़ीयग्रन्थगौरवः—

प्रकाशितग्रन्थसंख्या—११८

( सामान्य )

# विरुदावलीलक्षणम्

श्रीमद्रूपगोस्वामिविरचितम्

सम्वत्—२०२०
मूल्यम्— ७५ नये पैसे

प्रकाशकः व मुद्रकः—
कृष्णदासबाबा

गौरहरिप्रेस, कुसुमसरोवर

# बिरुदावलीलक्षणम्

नमःश्रीकृष्णाय ।

प्रणम्य परमानन्दं वृन्दारण्यपुरन्दरम् ।
लिख्यते बिरुदावल्याः संक्षेपाल्लक्षणं मया ॥१॥
कलिकाश्लोकबिरुदैर्युता विविधलक्षणैः ।
कीर्तिप्रतापशौटीर्यसौन्दर्योन्मेषशालिनी ॥२॥
कलिकाद्यन्तसंसर्गिपद्या दोषविवर्जिता ।
शब्दाडंबरसंबद्धा कर्त्तव्या बिरुदावली ॥३॥
व्युत्पन्नः सुस्थिरमतिर्गतग्लानिर्गलस्वनः ।
भक्तः कृष्णे भवेद् यः स बिरुदावलिपाठकः ॥४॥

तत्र कलिकालक्षणम्

कला नाम भवेत्तालनियता पदसन्ततिः ।
कलाभिः कलिका प्रोक्ता तद्भेदाः षट् समीरिताः ॥५॥
कलिका चण्डवृत्ताख्या द्विगादिगणवृत्तका ।
तथा त्रिभंगीवृत्ताख्या मध्या मिश्रा च केवला ॥६॥

१—तत्र चण्डवृत्तम्

चण्डवृत्तं द्विधा तत्र सामान्यं च संलक्षणम् ।
अत्र संयुक्तवर्णानां नियमो दशधा च ते ॥७॥
मधुरश्लिष्टविश्लिष्टशिथिलह्रादिनस्त्वमी ।
भिद्यन्ते ह्रस्वदीर्घाभ्यां ते दर्श्यन्ते यथास्फुटम् ॥८॥
ह्रस्वान्मधुरसंयोगाः शंकरांकुशकिंकराः ।
तस्मात्तु श्लिष्टसंयुक्ताः दर्पकर्परसर्पवत् ॥९॥
ततो विश्लिष्टसंयुक्ता भल्लकल्याणचिल्लयः ।
तथा शिथिलसंयुक्ताः पश्यकश्यपवश्यवत् ॥१०॥

प्रोक्ता ह्रादियुता मह्यं सह्यं गुह्यं प्रसह्यवत्।
गर्हादीन् ह्रादिसंयुक्त भेदान् केचिन समुचिरे ॥११॥
दीर्घास्तु गाङ्गं कार्पासं बाल्यं विश्वश्च बाह्यकम्।

तत्र कलापरिमाणम्

अधिकाश्चेच्चतुःषष्टिर्न्यूना द्वादश ताः कलाः।
एताभ्यो नाधिका कार्या न्यूनाश्चापि न पण्डितैः ॥१२॥
दशस्वपिच संयुक्तेष्वालक्ष्यो नियमो हि यः।
आद्यायां स तु कर्तव्य उत्तरासु कलास्वपि ॥१३॥

तत्र सामान्यं चण्डवृत्तम्

सामान्यचण्डवृत्ताख्यकलिकालक्षणं यथा।
दलस्यैकस्य मादीनां गणानां बन्धनं पुनः ॥१४॥
एकद्वित्रिचतुःपञ्चक्रमेणातःपरं न हि।
गुरोर्लघोर्द्वयोर्वाथ गणास्तेष्वेकया धृतिः ॥१५॥
गणपञ्चकसंबद्धा कला पञ्चदशार्णका।
लघुना षोडशयुता द्वाभ्यां सप्तदशार्णका ॥१६॥
परा सप्तदशार्णेभ्यश्चण्डवृत्तकला न हि।
न्यूना वर्णत्रयाच्चेति कलायां लक्षणं त्विदम् ॥१७॥
एको गणस्तु गुर्वन्तो लघ्वन्तो तद्द्वियुग-यथा ॥
तत्रैको गुर्वन्तः-"कंसध्वंसिन् पुष्पोत्तंसिन्" इत्यादि।
लघ्वन्तो यथा-"भक्तिप्रीत वक्तिश्रीद" इत्यादि।
गुरुलघ्वन्तो यथा-"विश्वस्य प्रेष्ठ सर्वस्य श्रेष्ठ" इत्यादि।
गुरुद्वन्द्वान्तो यथा-"रंगालीसिंधो रम्यांगीबंधो" इत्यादि।
लघुद्वन्द्वान्तो यथा-"वीर श्रीधर धीरप्रीतिद" इत्यादि।
द्वौ त्रयश्चाथ चत्वारः पञ्चाप्येवं स्मृता मताः।
मयौ गणौ च गुर्वन्तौ लघ्वन्तौ तद्द्वयान्वितौ ॥१८॥
तत्र मयौ केवलौ यथा-"नन्दप्रेष्ठ विष्णो, कन्दर्पेष्ट जिष्णो" इत्यादि।

तौ गुर्वन्तौ यथा–"कालिन्दीतटोल्लासिन् रोलंबीकुलोद्भासिन्" इत्यादि।

लघ्वन्तौ यथा–'कालिन्दीकृतोल्लास सारंगीधृतोद्भास' इत्यादि।

गुरुद्वन्द्वान्तौ यथा–"वृन्दारण्यमल्लीनन्दिन् मन्दारम्भखल्यानिन्दिन्" इत्यादि।

गुरुलघ्वन्तौ यथा–"गौरांगीकलासंगीत सारंगीघटासंवीत" इत्यादि।

लघुद्वन्द्वान्तौ यथा–'वृन्दारण्यवल्लीप्रिय कुन्दारब्धवल्लीक्रिय' इत्यादि।

गणत्रयादिकाश्चैवं बुधैर्ज्ञेयाः क्रमात् कलाः।
समवृत्तानि पद्यानि त्र्यक्षरादीनि यानि तु॥१९॥
तथा मेघाक्षरान्तानि सुश्रवाणि निसर्गतः।
सामान्यचण्डवृत्तस्य कलात्वं तानि पूर्ववत्॥
संयुक्तवर्णनियमाद् भजन्तीति सतां मतम्॥२०॥

अथ सलक्षणं चण्डवृत्तम्

द्विधा सलक्षणश्चण्डो नखो विशिख इत्यपि।

(क) तत्र नखः

नखाख्यं चण्डवृत्तन्तु प्रोक्तं विंशतिधा बुधैः॥२१॥
आदौ रणाभिध-(१) स्तद्वद्वीरभद्रो-(२) ऽपराजितम् (३)।
पुरुषोत्तमसंज्ञं च (४) वर्द्धितं (५) वेष्टनं (६) तथा॥२२॥
समग्रम (७) च्युताख्यं च (८) तथा मातंगखेलितम् (९)।
उत्पलं(१०)कन्दलः(११)कल्पद्रुमश्च(१२)स्खलितं।(१३) तथा।
स्यात्तु रंगो (१४) गुणरति [१५] स्तथा पल्लवितं [१६] परम्।
तरत्समन्तं [१७] काशाख्यं [१८] तिलकं [१९] यतिनर्तनम् [२०]॥२४॥

[१]तत्र रणः

जरतैर्भेन बद्धाभिः कलाभिः पूर्वसंख्यया।

सर्वत्र श्लिष्टयुतकं चण्डवृत्तं रणाभिधम् ॥२५॥
यथा-सदर्पसर्पविस्पर्धिस्फुरद्भुजप्रसर्पविभ्रमध्वस्तद्विषद्ध्वज ।
सदर्परक्तविप्र ड्रविचित्रित प्रहर्षचक्रवल्गज्जनस्तुत ॥इत्यादि ।

[२] अथ वीरभद्रः

मभनैर्नैन बद्धाभिश्चतुः श्लिष्टयुतादिभिः ।
अष्टमात्राच्छिदाभिस्तु कलाभिरुपकल्पितम् ।
वीरभद्रतयाख्यातं चण्डवृत्तं प्रचक्षते ॥२६॥
यथा-उद्यद्विद्युत्प्रतिभटनवपट नम्रब्रह्मस्तुतपदसरसिज ।
दृप्यद्वत्सरतबकितरसभर रक्षद्दक्षप्रियजनपरिकर ॥ इत्यादि ।

[३] अथापराजितम्

भसजग्लैर्निबद्धैस्तैरादौ मधुरयोगतः ।
षष्ठाष्टमदशस्थाने दीर्घसंयोगशालिभिः ।
अंशैः कृतमिदं नाम्ना स्याच्चण्डमपराजितम् ॥२७॥
यथा-दण्डितबकदानवोरुकाय खण्डितखलजात भूरिमाय ।
मण्डितवरनागरीबिहार चण्डितपददारिताहिसार ।इत्यादि ।

[४] अथ पुरुषोत्तमः

ससभैः कल्पितैरंशैर्दीर्घश्लिष्टमनोहरैः ।
क्रमात् षष्ठेऽष्टमे तुर्ये दीर्घश्लिष्टसमन्वितैः ।
निबद्धं चण्डवृत्तान्तु पुरुषोत्तमनामकम् ॥२८॥
यथा-पुरुषोत्तम वीरव्रत यमुनाद्भुततीरस्थित ।
मुरलीध्वनिपूरक्रिय सुरभीव्रजनादप्रिय ॥ इत्यादि

[५] अथ वद्धितम्

भनजैर्जेन लघुना बद्धैरंशैः समन्वितम् ।
एकाष्टैकादशस्थाने श्लिष्टसंयोगशालिभिः ।
चण्डवृत्तमिदं नाम्ना वर्द्धितं कवयो विदुः ॥२९॥
यथा-गर्वितखलगणदर्पविमर्दन चर्ब्वितदनुजनिरर्गलवर्द्धन ।
विक्रमलवपरिमर्दितपन्नग विभ्रमसमयसमुद्धृतसन्नग । इत्यादि

[६] अथ वेष्टनम्

नयलैर्लैन संबद्धैः पञ्चमे दीर्घशालिभिः ।
षष्ठे दीर्घात् श्लिष्टयुतैर्बद्धं भवति वेष्टनम् ॥३०॥

यथा-मधुरिमपूराद्भुत युवतिगणोपाश्रित ।
रवितनयातीर्थग सखिपटलीवेष्टित ॥ इत्यादि ।

[७] अथ समग्रम्

जराभ्यां कल्पितैरंशैस्तुर्यान्मधुरशालिभिः ।
श्लिष्टैरन्त्याद् द्वितीयाच्च सर्वान्ते लघुशालिभिः ।
बद्धः समग्रनामायं चण्डो माधववल्लभः ॥३१॥

यथा-समग्ररंजन स्फुरत्प्रभंजन प्रशस्तडंबर प्रवल्गदंबर ॥ इत्यादि

[८] अथाच्युतः

नजाभ्यां कल्पितैरंशैः पञ्चमे दीर्घशालिभिः ।
अन्त्याच्छ्लिष्टयुतोपेतैश्चण्डमच्युतमूचिरे ॥३२॥

यथा—पुलिनविहार स्फुरदुरुहार प्रियपरिवार स्तुतगणभार ॥
॥ इत्यादि ॥

[९] अथ मातंगखेलितम्

रगलैः कल्पितैरंशैः प्रथमे च तृतीयके ।
दीर्घयुक्तैश्चतुर्थात्तु मधुरश्लिष्टयोगिभिः ।
निबद्धं चण्डवृत्तन्तु नाम्ना मातंगखेलितम् ॥३३॥

[क] तत्र मधुरयोगाद् यथा

कंसमातङ्ग भेदितारंग वीर सारंग शीलितासंग ॥ इत्यादि ।

[ख] श्लिष्टसंयोगाद् यथा—

गोपिकाजुष्ट राधिकातुष्ट देवतावर्ग भावितानर्घ ॥इत्यादि ।
एकत्र केचिदिच्छन्ति निबद्धमनयोर्द्वयोः ॥३४॥

यथा-भानुजाकुंज माधुरीपुंज लालसाकृष्ट राधिकादृष्ट॥इत्यादि

[१०] अथोत्पलम्

भाभ्यां विनिर्मितैरंशैराद्यात्तु श्लिष्टयोगतः ।

चतुर्थाच्च तथा धीरा उत्पलाख्यं प्रचक्षते ॥३५॥
यथा-दर्पसमुद्धतसर्पविनिर्जय दक्षविलक्षणपक्षहतक्षण॥इत्यादि

[११] अथ कन्दलः

अदौ मधुरसंयोगात् कन्दलं तं विदुर्बुधाः ॥३६॥
यथा-खण्डितदुर्जन मण्डितसज्जन गंजितपन्नग रंजितसन्नग ॥इत्यादि॥

[१२] अथ कल्पद्रुमः

तजयैः कल्पितैरंशैर्बद्धमाद्यद्वितीयतः ।
तथा बाणेभनन्देभ्यः श्लिष्टसंयोगशालिभिः ।
एतं कल्पद्रुमं नाम चण्डवृत्तं प्रचक्षते ॥२७॥
यथा-विद्युन्निभकुट्मलकर्ण स्फूर्जज्जलदप्रभवर्ण ।
क्रध्यन्खलमर्दनदक्ष श्रुत्युच्चलचिक्कणपक्ष ॥इत्यादि॥

[१३] अथास्खलितम्

तरभैर्लेन गदितैरंशैरादौ तु दीर्घिभिः ।
द्वितीयाच्च चतुर्थाच्च षष्ठात् सप्तमतस्तथा ।
श्लिष्टसंयोगघटितैश्चण्डोऽस्खलितनामकः ॥३८॥
यथा-कारुण्यवृत्तिमच्चित्ततट तारुण्यचिह्नमृद्वक्त्रपुट
चातुर्यशिक्षितब्रह्महर माधुर्यरंजितस्वच्छनर ॥इत्यादि॥

[२४] तुरंगः

भनजैर्लेन संबद्धैरादेरष्टमतस्तथा ।
स्फुरन्मधुरसंयुक्तै रंशैर्बद्धस्तुरंगकः ॥३९॥
यथा-मंजुलविचकिलकुण्डलरंजितवरतनुमण्डल
संगतयुवतिकदंबक लंगिममुखशशिचुंबक ॥इत्यादि॥

[१५]अथ गुणरतिः

सनलैः कल्पितैरंशैस्तृतीये दीर्घशालिभिः ।
बद्धं गुणरतिं नाम्ना चण्डवृत्तं प्रचक्षते ॥४०॥

यथा-यमुनातटचर नवनागरवर दनुजाबलिहर मधुराकृतिधर ॥इत्यादि॥

[१६] अथ पल्लवितम्

भतनैर्नन लघुना बद्धै रंशैर्मनोरमैः ।
आद्याद्विश्लिष्टयुतकैश्चतुर्थे पञ्चमे तथा ।
दीर्घोदारैः समायुक्तं चण्डं पल्लविताभिधम् ॥४१॥

यथा-बल्लवलीलासमुदयपरिचित पल्लवरागाधरपुटविलसित
वल्लभगोष्ठीपरिवृतमुनिगण दुर्लभकेलीभरमधुरिमकण ॥इत्यादि॥

[१७] अथ तरलसमन्तम्

जमसैर्लद्वयेनोत्थैः पञ्चमे पदभंगिभिः ।
द्वितीयाच्छ्लिष्टयोगाद्यैश्चतुर्थान्मधुरोज्ज्वलैः ॥४२॥
पञ्चमाच्छ्लिष्टयोगाद्यैः षष्ठे दीर्घमनोहरैः ।
नवमे च तरत्पूर्वं समन्तं परिचक्षते ॥४३॥

यथा—विपक्षगंधक्षेपणकोविद चिनम्रवृन्दक्रीडनशोभित
निसर्गरंग भ्राजितभूधर समग्रबिंब श्रीरुचिराधर ॥इत्यादि॥

[१८] अथ काशाख्यम्

भभ्रलैर्घटितैरंशैरादेर्मधुरयोगिभिः ।
चतुर्थाच्छ्लिष्टयुतकैः सप्तमे नवमे तथा ।
दीर्घसंयोगिभिर्युक्तं काशाख्यं चण्डमूचिरे ॥४४॥

यथा-पिंछलसद्घननीलकेश चन्दनचर्चितचारुवेश
खण्डितदुर्जनवारमाय मण्डितनिर्मलनीलकाय । इत्यादि॥

[१९] अथ तिलकम्

ननस्ननैः कृतैरंशैर्नवमान्मधुरोज्ज्वलैः ।
निबद्धं चण्डवृत्तन्तु तिलकाख्यमथोचिरे ॥४५॥

यथा--व्रजवरतनुमुखचुंबनपटुतर तरणिदुहितृतटमण्डनपरिकर

तिलकपदबिहितकुंकुमपरिमल रुचचलदविकलपंकजनवदल
॥इत्यादि॥

[२०] अथ यतिनर्तनम

भाभ्यां रेण च लाभ्यां च क्लिप्तैरंशैस्तृतीयतः।
षष्ठाच्च श्लिष्टसंयुक्तैः सप्तमान्मधुरान्वितैः।
नवमाच्च पुनः श्लिष्टयोगिभिर्यतिनर्तनम् ॥४६॥
यथा-कलितप्रबलस्पन्दविभ्रमयुवतिप्रकरस्कन्धवर्तित-
करकुट्मलकग्रंथिसज्जितनवगर्भकसुकुन्तलव्रज ॥इत्यादि ।

[क] अथ विशिखाख्यश्चण्डः

स्यात् पञ्चधा स विशिखः पद्मं कुन्दश्च चंपकम्।
वञ्जुलं बकुलञ्चेति कामस्यामी शरा मतः ॥४७॥

तत्र [१] पद्मम

अच्युतस्तु भवेत् पद्मं पञ्चमाद्युक्तसंयुतः ॥४८॥
यथा—जयजय नन्द व्रजजनशन्द स्मरमदधृष्ट प्रियजनहृष्ट
॥इत्यादि॥

इदमेव बुधाः केचित् पद्मं दीर्घान्तिमं जगुः।
अतः सर्वकलान्ते तु भवेल्लघुचतुष्टयम् ॥४९॥
यथा—जय जय पद्माप्रियतम पद्माद्भुतकरसन्दीपितरसबन्दी—
कृतसुर...... ॥इत्यादि॥
अस्यैव केचिदिच्छन्ति लचतुष्टयमुत्तरम् ॥५०॥
तथा--कुण्ठीकृतखल किण्ठिरुचिपट संभीषितखल कु भीश्वरगत
॥इत्यादि॥
इदमेव भवेत् पद्मं गदितं षड्विधं बुधैः।
पंकेरुहं सितं कंजं तथा पाण्डूत्पलं मतम् ॥
इन्दीवरारुणांभोजे कह्लारञ्चेति कीर्तितम् ॥५१॥

[क] तत्र पंकेरुहम्

स्याच्चेत् कवर्ग्यमधुरं पूर्वपञ्चमवर्णकम्।

पद्मं पंकेरुहं प्रोक्तं कलिकावेदिभिबुधैः ॥५२॥
यथा--जय गतशंक प्रणयिषु वंक द्विषदुरुटंक प्रणयविटंक ॥इत्यादि॥

तद्भेदः--जय जय भृंगीमुदितकुरंगी दृगुदितभंगी ॥इत्यादि।

[ख] अथ सितकंजम्

चवर्ग्यमधुरोपेतं तद्भवेत् सितकंजकम् ॥५३॥
यथा--जय कचचञ्चद्‌द्युतिसमुदञ्चन्मधुरिमपञ्चस्तबकितपिंछ ॥इत्यादि॥

तद्भेदः--जय जय मुञ्जानलहर गुञ्जाप्रिय ॥इत्यादि॥

एवं सर्वत्र ज्ञेयम्।

(ग) अथ पाण्डूत्पलम्

टवर्ग्यमधुरोपेतं पाण्डूत्पलमुदीर्यते ॥५४॥
यथा--जय जय दण्डप्रिय कचषण्डग्रथितशिखण्ड ॥इत्यादि॥

(घ)अथेन्दीवरम्

तवर्ग्यमधुरोपेतं तदेवेन्दीवरं विदुः ॥५५॥
यथा--जय जय हन्त द्विषदिभहन्त
र्मधुरिमसन्तर्पितजगदन्तः ॥इत्यादि॥

(ङ) अथारुणांभोजम्

पवर्ग्यमधुरोपेतमरुणांभोजमुच्यते ॥५६॥
यथा-- जय रससंपद्विरचितझंप
स्मरकृतकंप प्रियजनशंप ॥इत्यादि॥

(च) अथकह्लारम्

विश्लिष्टयुतमेतत्तु कह्लारं परिचक्षते ॥५७॥
यथा--जय रसफुल्ल स्मरशरतुल्य
प्रभनखभल्ल व्रजकुलमल्ल ॥इत्यादि॥

(२) अथ कुन्दम्

भजाभ्यां कलितैरंशैः प्रायश्छिन्नैर्द्विशोऽक्षरैः ।
आद्यपञ्चमयोर्युक्तोत्तरितैः कुन्दमुच्यते ॥५८॥

यथा--नन्दकुलचन्द्र लुप्त भवतन्द्र
कुन्दजयिदन्त दुष्टकुलहन्तः ॥इत्यादि॥
पञ्चमं चेद् दीर्घयुतं कुन्दभेदस्तदोच्यते ॥५६॥
यथा--रुक्म भवपीत वस्त्रपरिवीत
चित्तहर शीत मञ्जुकलगीत ॥इत्यादि॥

(३) अथ चंपकम्

भनाभ्यां कल्पितैरंशैर्युक्तपूर्वादिवर्णकैः ।
सानुप्रासैः प्रतियुगभादावन्तेऽपि चंपकम् ॥६०॥
यथा--सञ्चलदरुण चञ्चलकरुण
सुन्दरनयन कन्दरशयन ॥इत्यादि॥

(४) अथ बञ्जुलम्

नजलैर्घटितैरंशैर्मधुरोत्तरपञ्चमैः ।
निबद्धं बञ्जुलं नाम कलिकावेदिनां मतम् ॥६१॥
यथा--जय जय सुन्दर विहसितमन्दर
निजगिरिकन्दर रतिरसशंकर ॥इत्यादि॥
भवेद् बञ्जुलभेदस्तु तदेव श्लिष्टसंयुतः ॥६२॥
यथा--जय मणिदर्पण नखरमुदर्पण
रुचिजितदर्पक बिपदपसर्पक ॥इत्यादि॥

(५) अथ बकुलम्

शृंखलाबद्धघटितं बकुलं परिचक्षते ।
भासुरं मंगलं तुंगमिति स्याद् बकुलं त्रिधा ॥६३॥

(क) तत्र भासुरम्

मिथः शृंखलितैर्बद्धं भासुरं पञ्भटीपदैः ॥६४॥
यथा--जय जय वंशीवाद्यविशारद शारदसरसीरुहपरिभावक
भावकलितलोचनसञ्चरण चारणसिद्धवधूधृतिहारक ॥इत्यादि॥

[ख] अथ मंगलम्

द्विशः शृंखलितैरंशैर्भाभ्यां बद्धैस्तु मंगलम् ॥६५॥

यथा--त्वं जय केशव केशबलस्तुत
वीर्यबिलक्षणलक्षणबोधित ॥इत्यादि॥

[ग] अथ तुंगम्

अंशैर्मिथः शृंखलितैः संयुक्तनियमोज्झितैः ।
निबद्धं कुन्दमेवात्र तुंगमित्यभिधीयते ॥६६॥
यथा--नाथ जय कृष्ण कृष्णदानराजि
राजिरुचिजात जातरतिबंधु बंधुरितनेत्र ॥इत्यादि॥
एवं प्रकारैरपरैर्मधुरश्लिष्टयोगतः ।
विश्लिष्टशिथिलादीनां योगतश्च परः शताः ।
चण्डवृत्तप्रबंधाः स्युः कस्तान् कात्स्न्र्येन वक्ष्यति ॥६७॥
२। अथ द्विगादिगणवृत्तकलिका
द्विगोदिगणवृत्ताख्या कलिकाथ निगद्यते ।
एषा तु कलिकाभिज्ञैः कथ्यते मंजरीत्यपि ॥६८॥
पंचधेयं द्विगादिश्च रादिर्मादिश्च कीर्तिता ।
चतुर्थी स्यान्नकलिका गानाख्या पंचमी मता ॥६९॥
कोरको गुच्छकश्चैव संफुल्लं कुसुमं तथा ।
गंधश्चेति द्विगाद्यादि कलिकाख्याः स्मृताः क्रमात् ॥७०॥
चण्डवृत्ते तु यः प्रोक्तो नियमः खलु संयुते ।
द्विगादिगणवृत्ते तं नैव बध्नन्ति पण्डिताः ॥७१॥
नातिदीर्घेह कलिका नातिह्रस्वा च संमता ॥७२॥

अथ द्विगादिकलिका

द्विगादिकलिकां धीराः कोरकाख्यां प्रचक्षते ॥७३॥
द्विगभस्नलसन्दर्भैरनन्यगणपातिभिः ।
स्वेच्छावसानैः संक्लृप्तां द्विगादिकलिकां विदुः ॥७४॥
अत्रगणाः--शौरे माधव भगवन्मुरहर ।
तदुदाहरणम्--मानवतीमदहारिविलोचन
दानवमण्डलघूकविरोचन ॥इत्यादि॥

अथ रादिकलिका

अभिज्ञै रादिकलिका गुच्छाख्या बिनिगद्यते ।
रनगभलनललैर्बद्धै रनन्यगणसंगिभिः ।
श्लिष्टान्तैरनुषक्तैः स्यात् कलिका रादिरंशकैः ॥७५॥
तत्र गणाः—हे हरे मुररिपो केशिहर बकमथन ।
तदुदाहरणम्—नवजलदसंचयद्युतिनिकरसुन्दर
श्रुतिचलितकुण्डलप्रभमधुरचन्द्रक ॥इत्यादि॥

अथ मादिकलिका

मादिं तु कलिकां प्राहुर्धीराः संफुल्लसंज्ञकाम् ।
मस्तजैर्नमनैर्जाभ्यां नत्रयेण च कल्पितैः ॥७६॥
तृतीयायान्तु मात्रायामच्छिन्नैः स्वगणांकितैः ।
स्वेष्टावसानैः संबद्धा स्यान्मादिकलिका दलैः ॥७७॥
अत्र गणाः—कंसारे बनमालिन् केशिरिपो पशुपमणे
दामोदर नरकान्तक नन्दतनय कमलनयन ॥
तदुदाहरणम्—पिंछालीदलपाली धातुवटाकुसुमजटा-
मालाकुल रचितातुल वेशघटन पुलिननटन ॥इम्यादि॥

अथ न—कलिका

आचक्षते न- कलिकां कुसुमाख्यां विचक्षणा ।
नैरेव स्वावधिच्छिन्नैः क्लृप्ता न- कलिका मता ॥७८॥
यथा—कुसुमनिकररचितचिकुर किरणविजितमधुरमुदिर
कमलरुचिरनयनगगल बसनदलितकनकपटल ॥इत्यादि॥

अथ गानकलिका

एषा तु गानकलिका गंधाख्या कथिता बुधैः ।
आदिगेन तु नेनैव सर्वान्ते च गणस्पृशा ।
बद्धा स्याद्गानकलिका कलिकावेदिनां मता ॥७९॥
यथा—पुष्पशरकोटिरुचिहारिपदपद्मनख
गोपकुलमोदपर चारुतरवेशधर ॥देव॥

३। अथ त्रिभंगीवृत्तकलिका

अथ त्रिभंगीवृत्ताख्या कलिका प्रोच्यतेऽधुना ।
वृत्तेषु कलिकानाम्न विशेषे सा स्फुटीभवेत् ॥८०॥
त्रयाणामिह भंगानां समाहारस्त्रिभंगिका ।
भंगोऽनुप्रासरूपेण वर्णावृत्तिरिहेष्यते ॥८१॥
संयुक्तश्चात्र दीर्घश्च द्वयमेव सतां मतम् ।
माला बाला च शाला च मल्ली बल्लीच चिल्लिका ॥८२॥
षड्बिधा तु त्रिभंगीयमादौ शिखरिणी मता ।
तुरगाख्या दण्डकाख्या भुजंगाख्या चतुर्थिका ॥८३॥
तिग्माख्या च बिदग्धाख्या षडत्र कलिका मताः ॥८४॥

तत्र शिखरिणी

शिखरिण्यां त्रयो भंगाश्चतुः षष्ठत्रयोदशे ॥८५॥

तत्र पद्ये वृत्तिः—

यथा-इयं मल्लीवल्ली हसति हरिहल्लीशकसखी
गता वाटीनाटीललितपरिपाटीमघभिदः ॥इत्यादि॥

कलिकायां यथा- ब्रजनारीहारी पुलिनवरविहारी माधव
बरवंशोहंसीविलसितभवशंसी नागर ॥इत्यादि॥

अथ तुरगत्रिभंगो

गाभ्यां जसरनैस्तेन भलगैस्तुरगं बिदुः ।
भंगास्त्रयोऽस्य बिख्याता द्वितीयाष्टमषोडशे ।
अष्टादिषोडशान्तास्य कलिका पद्यवृत्तिगा ॥८६॥

यथा-ध्वस्तारबिन्दरुचिहस्ताग्रपिष्टसमस्तारिमण्डल हरे ॥इत्यादि॥

अथ दण्डकत्रिभंगी

दण्डकेषु च सर्वत्र दशमे भंग ईरितः ।
तच्चतुर्थात्तच्चतुर्थे तच्चतुर्थे क्रमादिह ॥८७॥
यावत्तद्गणवृद्धिः स्यात्तावाद्भङ्गाः प्रकीर्तिताः ।
एतादृशेषु वृत्तेषु त्रिभंगीत्युपलक्षणम् ।
च-तुर्भङ्गी पंचभंगी षड्भंगी चैव कीर्तिता ॥८८॥

तत्र चण्डवृष्टिप्रपातादि दण्डके यथा—
मधुमथन हरे मुरारे पुरारेरपारे ससारे
विहारे सुरारेरुदारे च दारे प्रभो ।
स्फुरसि रविसुतातरंगे सरंगे सुतुंगेतिसंगे
भुजंगेन्द्रसंगे सदंगेन भोः ॥इत्यादि॥

अथ भुजंगत्रिभंगी

तृतीयषष्ठनवमे भुजंगे भंग ईरितः ॥८९॥
तत्र पद्ये भुजंगवृत्तिर्यथा—
त्रिभंगीसुरंगीकुरंगीक्षणाभि—
र्विलासेन रासे सुवासेन मुग्ध ॥इत्यादि॥
अष्टादिषोडशान्ता तु कलिका प्रोक्तयोर्द्वयोः ॥९०॥

अथ तिग्मत्रिभंगी

गा ला द्वादशधाः प्रोक्ताश्चत्वारो गास्ततः पराः ।
यत्र वृत्ते तु भंगः स्यात् षड्विंशे तत्तृतीयके ॥९१॥
त्रयोविंशाक्षरात् प्रोक्तो नियमस्तत्र संयुते ।
प्रथमाच्च तृतीयाच्च मधुरश्लिष्टयोजना ॥९२॥
एवं षड्वारमावृत्ता सैषा तिग्मत्रिभंगिका ।
एवमष्टपदी प्रोक्ता बिरुदाल्यां क्वचिद्भवेत् ॥ ९३॥
यथा-इन्दुशुभ्रदन्तपंक्तिरंबुजन्मवृन्ददर्पनिन्दिरक्तफुल्लदृष्टिशाली-
माली ।
संचलत्कदंबपुष्पसंगिकर्णलंबिरम्यकुन्दगुच्छभंगिरिष्टसंगी
रंगी ॥इत्यादि॥

अथ विदग्धत्रिभंगी

द्वितीयाष्टमयोः स्थाने भंगश्चैव चतुर्दशे ।
भद्वये साध्वनुप्रासो यत्रैका कलिकेदृशी ॥९४॥
नलध्वन्तगुरुद्वन्द्वत्र्यावृत्तिर्भद्वयं तथा ।
एवमष्टकमारभ्य कला यावत्तु षोडश ॥९५॥
यस्यामेवंविधं लक्ष्म सा विदग्धत्रिभंगिका ।

समेयं बिरुदावल्यां कलिकापद्ययोस्तथा ॥९६॥

यथा–संगीतकनव भंगीपरिमलरंगीत्वमधिक फुल्लसमुल्लस
बृन्दावनभब मन्दारकुसुम बृन्दार्चितपद पल्लव बल्लव॥इत्यादि॥

एवमाद्या त्रिभंग्यास्तु स्तवकाव्येषु दीप्तिदाः ।
बृत्ते पद्येऽप्यनन्ताः स्युः कस्ताः कात्स्न्येंन वृद्यति॥९७॥

४ । अथ मध्यकलिका

आदाबन्ते च गद्यं स्यात् कलिका मध्यतः स्थिता ।
तां मध्यकलिकां प्राह पिंगलो भुजगेश्वरः ॥९८॥

यथा–उद्दण्डसव्यबाहुदण्डचण्डिमखण्डितदुष्टतुरंगदानवमुण्ड ।
दण्डितदुर्जन मण्डितसज्जन कुण्डलिमर्दन कुण्डलनर्तन सुन्दर-
गण्डस्थलभाण्डीरपिण्डिकारंग ताण्डवपण्डित ॥वीर॥इत्यादि

५ । अथ मिश्रकलिका

तिलतण्डुलबद्यत्र कलिकागद्ययोर्युतिः ।
सा मिश्रकलिका नाम षण्मुखेन प्रकीर्तिता ॥९९॥

यथा–दुर्दान्तदैत्यकण्टककुलकूयत्तयकेलिपूर
नन्दितबल्लवयौवतमण्डल
बन्दितनन्द तरंगितकुण्डल—
बंधुर मन्मथबिभ्रममन्दिर
मन्दरसुन्दरभूधरकन्दर—
नन्दितमंजुलबिक्रमडंबर
रम्यकलिन्दनन्दिनीकूलालंकार
गोकुलकरीषंकषवाह्यसुरपान भोगीन्द्र ।
कुंकुमडंबर बिस्फुरदंबर
बद्धशिखण्डक पन्नगदण्डक
रामश्रीदामवरुथपादिसुहृद्वरुथ—
दत्तमहोत्सबमण्डल ॥बीर॥इत्यादि॥

अथवा मिश्रकलिका नानाविधकलाश्रिता ।
बिभक्तिसप्तकालंबिसंबुध्यन्ता बुधैः स्मृता ॥१००॥

यथा-नन्दति हारी कुन्दविहरी
तं भज कृष्णं भक्तिसतृष्णं
नागरगुरुणा मर्दितचरणा ॥इत्यादि॥

अथ गद्यकलिका

क्वचिन्नानाविधं गद्यं कलिकास्थल इष्यते ।
तस्योदारणं स्पष्टं तेनालं लिखनश्रमैः ॥१०१॥
एताभिस्तु तथान्याभिः कलिकाभिर्निरन्तरा ।
बिरुदावलिरानन्दं रचयत्यघविद्विषः ।
आदिक्षान्तावलिः सर्वलघ्वी चात्र निबध्यते ॥१०२॥

तत्राक्षरमयी-असिताभ्रसुन्दर आरामरम्यसिंधुर इन्द्रमखभंजन
ईतिभवगंजन उत्तमपुरुष ऊर्जितपौरुष
ऋक्षोज्ज्वलनख ॥इत्यादि॥

सर्वलघ्वी यथा-व्रजवरतनुगण रतिपरिचयचण
तनुधृतदधिकण निजजनपरिपण
पदविलसितरण बिदलितफणिफण ॥इत्यादि॥

इति कलिकालक्षणम् ।

अथ श्लोकः

कलिकाद्यन्तयोः श्लोकः सगुणोत्कर्ष इष्यते ॥१०३॥

यथा-झमझमिति वर्षति स्तनितचक्रविक्रीडया
बिमुष्टरबिमण्डले घनघटाभिराखण्डले ।
ररक्ष धरणीधरोद्धृतिपटुः कुटुंबानि यः
स दारयतु दारुणं व्रजपुरन्दरस्ते दरम् ॥

अथ बिरुदः

बाशिकः कल्पितश्चेति बिरुदो द्विविधो मतः ।
संयुक्तनियमो ह्यत्र बर्णितः पूर्ववद्बुधैः ॥१०४॥
द्विचतुःषड्दशश्चात्र कलास्तु बिरुदे मताः ।
दशभ्यो नाधिकाः कार्याः कलास्तु बिरुदे बुधैः ॥१०५॥
कलिकाभ्यस्तु बिरुदे भिदासावेव कीर्तिता ।

विरुदं कवयः प्राहुर्गुणोत्कर्षादिवर्णनम् ॥१०६॥
विरुदः कलिका चान्ते धीरवीरादिशब्दभाक् ।
न पंचत्रिकतो न्यूना नाधिका त्रिंशतस्त्रिका ।
विरुदाली प्रकर्तव्या पौर्वापर्यविकल्पतः ॥१०७॥
रम्यया विरुदावल्या प्रोक्तलक्षणयुक्तया ।
स्तूयमानः प्रमुदितो वासुदेवः प्रसीदति ॥१०८॥
यः स्तौति विरुदावल्या मल्लक्षणविहीनया ।
पठन्तमपि तं साधु नैवांगीकुरुते हरिः ॥१०९॥

इतिश्रीरूपगोस्वामि-प्रभुपाद-प्रणीतं
सामान्यविरुदावलीलक्षणम्